।। चण्डी रहस्यम् ।।

यच्छक्तिलेशसकृदर्पणपात्रभाव मात्रादपि द्रुहिणशौरिमहेश्वराणाम्।
प्राप्तो यदि श्रुतिशतैः परमात्मभावस्तामम्ब देवि भवतीं किमिति स्तुवन्तु ।।01।।

महिषासुर वधः।।

कृत्वा मुखं पशुपतिर्भवतीं किलैकां निर्माति पालयति हन्ति जगन्ति देवः।
तज्जामिताविपरिवृत्तिकृते तमेव शम्भुं मुखं कृतवती भवतीति मन्ये ।।02।।

विश्वं नियच्छति विशृङ्खलचेष्टितो यः सोऽपि त्वया नियमनीय इति स्फुटं नः।
वैवस्वतं चिकुरभावजुषं यदम्ब बध्नासि वेणिकबरीग्रथनादिभेदैः ।।03।।

भ्रूकिङ्कराणि भुवनानि तव भ्रुवौ च सन्ध्यात्मिक इति गृणन्ति यतोऽत एव।
कर्माणि मातरितराणि करोतु मा वा सन्ध्याम् पुनर्भजत एव समस्तलोकः ।।04।।

जाता दृशो जननि पावकतेजसैव तिस्रस्तवेत्यपि किमागमबोध्यमेतत्।
पापान्यपाङ्गवलनैः परिमार्जतीनां तासां च पावकपदे विचिकित्सते कः ।।05।।

मूल्यं न यस्य भुवनानि चतुर्दशापि मुक्ताफलं वहति तत्तव नासिकेति।
चित्रीयते किमपि चेतसि मे न मातः किं राजराजपदवीं भजतामलभ्यम् ।।06।।

नासाधिकारमिह गन्धवहात्मकत्वं देवि श्रुती स्वयमपाहरतां भवत्याः।
सर्वाः श्रुतीरपि तु सा स्ववशे चकार किं दुर्लभं त्रिषु जगत्सु धनेश्वराणाम् ।।07।।

प्राच्यो जगज्जगनि ये पतयः प्रजानां ते देवि संववृतिरे दशनात्मना ते।
नो चेत्तदन्तिकतले रसनाग्रभागे किं भारती वसति किङ्करतां गतेव ।।08।।

स्वेनात्मना मुररिपुर्दनुजैर्विगृह्य वारान् कतीह न बभार पराङ्मुखत्वम्।
ओजायितुं स निरपायमुपायवेदी बाह्यात्मना परिणतो नियतं भवत्याः ।।09।।

वर्षन् करो महिषमर्दनि ते वसूनि प्रस्तूयतां कविजनैर्न ममाद्भुतम् तत्।
आसादिता वसुभिरङ्गुलिता यदीया कस्तस्य शंस वसुवर्षविधौ प्रयासः ।।10।।

सोमेऽमृतम् कतिचिदेव पुरा लभन्ते तल्लभ्यमस्तु जगतामिति तर्कयन्त्या।
नीतः पयोधरदशां स शिवे त्वया यदस्मादृशामयमतर्कितभाग्ययोगः ।।11।।

ब्रह्मर्षिशापभवया त्रपया महत्या प्रागास्त यः क्वचन देवि सरस्यदृश्यः।
नूनं स एष विबुधाधिपतिर्भवत्याः प्राप्तो वलग्नपदवीमधुनाप्यदृश्यः ।।12।।

पादौ बभूव तव पद्मभवस्ततः किं बाह्वात्मना परिणनाम हरिस्ततः किम्।
सिद्धा नितम्बविधया वसुधा यदा ते सिद्धस्तदा पुरहरस्य मनोरथोऽयम् ।।13।।

यद्वारुणं कथितमूरुयुगं सजङ्घमिन्दीवरच्छदसकान्ति न वारुणं तत्।
प्राचेतसं तदिह वर्णयितुं क्षमेत प्राचेतसं कविकुलप्रथमं विना कः ।।14।।

वक्रैरकृत्रिमवचांसि वहन् विषण्णो वेधाश्चिरं विपरिणम्य पदात्मना ते।
सन्धार्यतेऽद्य शिरसा सकलैरमीभिः क्लिष्टश्चिरात् किमुपयातु न जातु हर्षम् ।।15।।

बाह्यं तमो हरति यस्तपनः कथञ्चित्पादौ तवाङ्गुलितयाम्ब भजन् स एव।
अन्तस्तमांसि च हरत्यतिदुर्हराणि किं सेव्यसेवनविधिर्न करोति पुंसाम् ।।16।।

देवेषु वासवमुखेषु निजां निधाय शक्तिं यदम्ब समये पुनरग्रहीस्त्वम्।
कर्पूरभाजननयादधुनापि ते ते कीर्तिं वहन्ति कियतीमपि तावतैव ।।17।।

तेजांसि च प्रहरणानि च यानि यानि देवेषु देवि निहितानि पुरा भवत्या।
तान्येव निष्फलतराणि तदाश्रितानि त्वत्स्वीकृतानि फलवन्ति बभूवुरित्थम् ।।18।।

शक्त्या यया दिविचरा अतिशेरतेऽस्मान् सा च त्वमित्यवगतः सकलैश्च तन्त्रैः।
किं त्वं विचारकुशलैरसि सेवनीया किं देवतास्तव ऋजीषदृशां प्रपन्नाः ।।19।।

इन्द्रं यजन्तु तव गर्भमुपासते ते वह्निं यजन्तु नयने तव तर्पयन्ति।
भानुं नमन्तु विनमन्ति पदाम्बुजं ते सर्वं जगन्ननु समर्चति सर्वथा त्वाम् ।।20।।

केचित् प्रतीकमितरे तु समग्ररूपमाराधयन्ति तव ये पुनरास्तिका स्युः।
नास्तिक्यवादनिरता नरके पतन्तोऽप्यम्ब स्तुवन्ति चिकुरात्मकमन्तकेन ।।21।।

शौरिं विबोध्य समराय तमुद्यमय्य व्यामोह्य दानववरौ कृतसंविधाना।
मातस्त्वमेव मधुकैटभयोर्निहन्त्री शार्ङ्गी कृते भवति शस्त्रपदाभिषिक्तः ।।22।।

दैत्यौ वरं वितरतो निजनाशरूपं दैत्यारये त्रिजगतां वरदो वरार्थी।
इत्थं प्रचोदितधियां क्षममीश्वररत्वं वृत्तेषु किन्न सचिवोऽपि नृपं नियुङ्क्ते ।।23।।

न्यस्तं यदा शिरसि पादतलं भवत्या लब्धं तदैव महिषेण परं पदं ते।
हन्तुं पुनर्यदिदमाददिषे त्रिशूलं तत्ते जगज्जननि सङ्गरसम्भ्रमेण ।।24।।

कस्त्वां रणे जयतु कस्तव हन्तु दर्पं को वास्तु ते प्रतिभटो भविता पतिः कः।
दैत्यं प्रतारयितुमेव कृतोऽभ्युपायो देवं न विस्मृतवती भवती महेशम् ।।25।।

चण्डि द्विषस्तव निपेतुरपेतकृत्याश्चण्डाट्टहासनिनदैरिति नाद्भुतं नः।
दृष्टक्रियास्त्रिषु पुरेषु तवाप्रसिद्धो मन्दस्मितार्धमहिमा न हि मादृशानाम्।। 26 ।।

कर्माणि यानि दश ते जनभीषणानि कल्याणदानि भजतामभिजानतां वा।
तैरेव विश्वमखिलं परिवृत्तिभेदैर्बध्नासि मुञ्चसि च कुञ्चिकयेव यन्त्रम्।। 27 ।।

अन्वासितं हरिहरद्रुहिणैः सदारैर्जामातृभिस्तनुभवैर्दुहितुः सुतैश्च।
अग्रोपवेशितजगज्जननीसमाजमाराधये जननि रूपमनुत्तरं ते ।। 28 ।।

सर्वानुकम्पनपरं स्वकृतोपदेशैः सार्वज्ञगर्वशमनं तरुणेन्दुमौलेः।
सत्त्वैकसारमकृतोक्तिपथानुसारं सारस्वतं वपुरिदं तव चिन्तयामः।। 29 ।।

नन्दात्मजेति ननु वर्षसि हेमराशिं शाकम्भरीति शमयस्युदरोपसर्गान्।
योगीश्वरीति परिहृत्य भयानि भक्तान् मातेव पाययसि कामदुघौ स्तनौ ते ।। 30 ।।

इच्छात्मिका पुरहरस्य चिदात्मिका च शक्तिस्त्रिलोकविदिते न हि तत्र शङ्का।
ते चार्चिते जनयतः किल यत्प्रसादं तामाश्रये भगवतः कृतिशक्तिमाम्बाम्।। 31 ।।

त्वं चेतनासि हृदयं त्वमसि प्रजानां त्वं वृत्तयो धृतिमतिप्रमुखास्तदीयाः।
कैः साधनैरभिमुखीकरणं तव स्यात् स्वेनैव देवि दयसे यदि तद्येथाः।। 32 ।।

त्वत्पूजनं यदिह जानदजानदर्हं मातश्चकर्थ महती किल चातुरीयम्।
जानद्भिरेव भवती यदि पूजनीया लुप्येत पूजनकथैव जगत्त्रये ते।। 33 ।।

यावत्परत्वमखिलागमबोधितं ते तावत्ततः शतगुणं च सुखाश्रयासि।
वेदास्त्वदर्चनविधानपरा हि नो चेदम्ब स्युरब्धितरणोक्तिवदप्रमाणम्।। 34 ।।

प्राज्ञानभिज्ञसुलभां परिपूर्णशक्तिमव्याजभूतकरुणापरिणामरूपाम्।
अम्बां मनागपि मनस्यवलम्बमाना धीरा न बिभ्यति कथञ्चिदितोऽमुतो वा।। 35 ।।

अभ्यर्थनीयमखिलं भवदाश्रितानामभ्यर्थितं प्रथममेव हि देवसङ्घैः।
अम्ब स्मरन्सफलयाम्यवशिष्टमायुरङ्गानि ते भुवनमङ्गलमङ्गलानि।। 36 ।।

।। इति श्रीनीलकण्ठदीक्षितविरचितं चण्डीरहस्यं सम्पूर्णम् ।।